## न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्। (१०८/३१६८)

[1]रेफपरस्य सकारस्य सृपि सृजि स्पृशि स्पृहि[2] सवनादीनां च [3]मूर्धन्यो न भवति। [4]रपर – 'विस्रंसिकायाः [5]काण्डाभ्यां जुहोति' (मै. २.६.१)। [6]विस्रब्धः कथयति। सृपि – 'पुरा क्रूरस्य विसृपः' (वा. सं. १. २८) सृजि – [7]वाचो विसर्जनात्। स्पृशि – 'दिविस्पृशम्' (ऋ. १. १४२. ८)। स्पृहि – निस्पृहं कथयति। सवनादीनाम् – सवने सवने। सूते सूते। [8]सामे सामे। सवनमुखे सवनमुखे। किं स्यति[9] किंसंकिसम्। अनुसवनमनुसवनम्। गोसनिं (अ.वे. ३. २०. १०) गोसनिम्। अश्वसनिमश्वसनिम्। [10]पूर्वपदात् इति प्राप्ते प्रतिषेधः। अश्वसनिग्रहणम् अनिणोऽपि षत्वमस्ति इति ज्ञापनार्थम्। तेन[11] जलाषाहम्, अश्वषाहम् इत्येतत् सिद्धं भवति। क्वचिदेवं गणपाठः –

सवने सवने। [12]अनुसवनेऽनुसवने। सञ्ज्ञायां [13]बृहस्पतिसवः। शकुनिसवनम्। सोमे सोमे। सूते सूते। संवत्सरे संवत्सरे। किंसंकिसम्। बिसंबिसम्। मुसलंमुसलम्। गोसनिमश्वसनिम्। सवनादिः॥

## सात् पदाद्योः। (१०९/२१२३)

सात् इत्येतस्य, पदादेश्च[14] मूर्धन्यादेशो न भवति। 'विभाषा साति कार्त्स्न्ये' (५. ४. ५२/२१२२)। [15]प्रत्ययसकारत्वात् प्राप्तिः, पदादेश्च आदेशसकारत्वात्। सात् – अग्निसात्[16]। दधिसात्। [17]मधुसात्। पदादेः – दधि सिञ्चति। मधु सिञ्चति॥

## सिचो यङि। (११०/२६४०)

सिचः सकारस्य यङि परतो मूर्धन्यादेशो न भवति। [18]सेसिच्यते। अभिसेसिच्यते। उपसर्गात् (८.३. ६५/२२७०) [19]इति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते, न सिचो यङि इति। तस्मादयं प्रतिषेधः सर्वत्र[20] भवति। यङि इति किम्? अभिषिषिक्षति॥

## सेधतेर्गतौ। (१११/२२७८)

गतौ[21] वर्तमानस्य सेधतेः सकारस्य मूर्धन्यादेशो न भवति। अभिसेधयति गाः। परिसेधयति गाः[22]। गतौ इति किम्? शिष्यमकार्यात् [23]प्रतिषेधयति॥

---

1. पूर्वपदात् प्राप्त इति प्रतिषिध्यते इत्यधिकम् ब.क. 2. इत्येतेषाम् इत्यधिकम् क.ड.इ. 3. मूर्धन्यादेशः क. 4. रपरस्य क. 5. काण्डं मुद्रितः पाठः 6. विश्रब्धं ब.क.ड. 7. वाचा विसर्जनम् क. ड. इ, वाचो विसर्जनम् ह. 8. सोमे सोमे ब.क.ड.ह. 9. किंसे किंसं इ, किंस्यति इति किंसः ड. 10. पूर्वपदात् इति नास्ति ब.ड. 11. एतत् तुराषाहम् इत्यत्रापि भवति ब. 12. अनुसवनमनुसवनम् ड. 13. बृहस्पतिसवनम् क. 14. सकारस्य इत्यधिकम् ब.क.इ.ह. 15. सातिप्रत्ययः इत्यधिकम् क. 16. वायुसात् इत्यधिकम् ब. क. ड. 17. मधुसात् नास्ति क.इ. 18. परिसेसिच्यते ड. 19. इति नास्ति ब. 20. न इत्यधिकम् क. 21. अर्थे इत्यधिकम् ब.क. 22. कालयति इत्यर्थः इत्यधिकम् ब.ह, चालयति इत्यर्थः इत्यधिकम् ड. 23. प्रतिषेधति ब.ड.